# श्रीमद्भगवद्गीता
# Śrīmad-Bhagavad-gītā
# The Song of the Lord
# Chapter Sixteen
# Version 0.1

March 31, 2001

# Chapter 16

# दैवासुरसम्पद्विभागयोगः

श्रीभगवान् उवाच
अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ १ ॥
अहिंसा सत्यम् अक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥ २ ॥
तेजः क्षमा धृतिः शौचम् अद्रोहो नातिमानिता ।
भवन्ति संपदं दैवीम् अभिजातस्य भारत ॥ ३ ॥

श्रीधरः

आसुरीं सम्पदं त्यक्त्वा दैवीमेवाश्रिता नराः ।
मुच्यन्त इति निर्णेतुं तद्विवेकोऽथ षोडशे ॥

पूर्वाध्यायास्तु एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारतेत्युक्तम् । तत्र क एतत् तत्त्वं बुध्यते । को वा न बुध्यते । इत्यपेक्षायां तत्त्वज्ञानेऽधिकारिणोऽनधिकारिणश्च विवेकार्थं षोडशाध्यायस्यारम्भः । निरूपिते हि कार्यार्थेऽधिकारिजिज्ञासा भवति । तदुक्तं भट्टैः —

भारो यो येन वोढव्यः स प्राग् आन्दोलिता यदा ।
तदा कण्डस्य वोढेति शक्यं कर्तुं निरूपणम् ॥ इति ।

तत्राधिकारिविशेषणभूतां दैवीं सम्पदम् आह अभरम् इति त्रिभिः । अभयं भयाभावः । सत्त्वस्य चित्तस्य संशुद्धिः सुप्रसन्नता । ज्ञानयोग आत्मज्ञानोपाये व्यवस्थितिः परिनिष्ठा । दानं स्वभोज्यस्य अन्नादेर् यथोचितं संविभागः । दमो बाह्येन्द्रियसंयमः । यज्ञो यथाधिकारं दर्शपौर्णमासादिः । स्वाध्यायो ब्रह्मयज्ञादिः । जपयज्ञो वा । तप उत्तराध्याये वक्ष्यमाणं शारीरादि । आर्जवम् अवक्रता ॥ १ ॥

किं चाहिंसेति । अहिंसा परपीडावर्जनम् । सत्यं यथादृष्टार्थभाषणम् । अक्रोधस्ताडितस्यापि चित्ते क्षोभानुत्पत्तिः । त्याग औदार्यम् । शान्तिश्चित्तोपरतिः । पैशुनं परोक्षे परदोषप्रकाशनम् । तद्वर्जनम् अपैशुनम् । भूतेषु दीनेषु दया । अलोलुपतम् अलोलुपत्वं लोभाभावः । अवर्णलोप आर्षः । मार्दवं मृदुत्वम् अक्रूरता । ह्रीर् अकार्यप्रवृत्तौ लोकलज्जा । अचापलं व्यर्थक्रियाराहित्यम् ॥ २ ॥

इं च तेज इति । तेजः प्रागल्भ्यम् । क्षमा परिभवादिषु उत्पद्यमानेषु क्रोधप्रतिबन्धः । धृतिर् दुःखादिभिर् अवसीदतश्चित्तस्य स्थिरीकरणम् । शौचं बाह्याभ्यन्तरशुद्धिः । अद्रोहो जिघांसाराहित्यम् । आतिमानिता आत्मन्यतिपूज्यत्वाभिमानः । तदभावो नातिमानिता । एतान्यभयादीनि षड्विंशतिप्रकाराणि दैवीं सम्पदम् अभिजातस्य भवन्ति । देवयोग्यां सात्त्विकीं सम्पदम् अभिलक्ष्य तदाभिमुख्येन जातस्य । भाविकल्याणस्य पुंसो भवन्तीत्यर्थः ॥ ३ ॥

**विश्वनाथः**

षोडशे सम्पदं दैवीम् आसुरीम् अप्यवर्णयत् ।
सर्गं च द्विविधं दैवम् आसुरं प्रभुर् अक्षयात् ॥

अनन्तराध्याये ऊर्ध्वमूलम् अधःशाखम् इत्यादिना वर्णितस्य संसाराश्वत्थवृक्षस्य फलानि न वर्णितानीत्यनुस्मृत्यास्मिन्न् अध्याये तस्य द्विविधानि मोकचानि बन्धकानि च फलानि वर्णयिष्यन् प्रथमं मोकाअन्याह अभयम् इति त्रिभिः । त्यक्तपुत्रकलत्रादिक एकाकी निर्जने वने कथं जीविष्यामीति भयराहित्यम् अभयम् । सत्त्वसंशुद्धिश्चित्तप्रसादः । ज्ञानयोगे ज्ञानोपायेऽमानित्वादौ व्यवस्थितिः परिनिष्ठा । दानं स्वभोज्यान्नादेर् यथोचितं संविभागः । दमो बाह्येन्द्रियसंयमः । यज्ञो देवपूजा । स्वाध्यायो वेदपाठः । आदीनि स्पष्टानि । त्यागः पुत्रकलत्रादिषु यमतात्यागः । अलोलुप्त्वं लोभाभावः । एतानि षड्विंशतिर् अभयादीनि दैवीं सात्त्विकीं सम्पदम् अभिलक्ष्य जातस्य सात्त्विक्याः सम्पदः प्रात्व्यञ्जके क्षणे जन्म लब्धवतः पुंसो भवन्ति ॥ १-३ ॥

**बलदेवः**

दैवीं तथासुरीं कृष्णः सम्पदं षोडशेऽब्रवीत् ।
पादेयत्वहेयत्वे बोधयन् क्रमतस्तयोः ॥

पूर्वत्र अश्वत्थमूलान्यनुसन्ततानि इत्यादिना प्राचीनकर्मनिमित्ताः शुभाशुभवासनाः संसारतरोर् अवान्तरमूलत्वेनोक्ताः ।एता एव नवमे दैव्यासुरी राक्षसी चेतेइ प्राणिनां प्रकृतयो निगदिताः । तत्र वैदिकार्थानुष्ठान् अहेतुः सात्त्विकी शुभवासना मोक्षोपायोगिनी दैवी प्रकृतिः ।सैवेह दैवी सम्पत् तरोर् उपादेयं फलम् ।स्वाभाविकरागद्वेषानुसारिर्णी सर्वानर्थहेतू राजसी तामसी चाशुभवासना आसुरी राक्षसी च प्रकृतिनिरयनिपातोपयोगिनी सा ।सा चासुरसम्पत्तयोर् हेयं फलम् इत्येतद्बोधयितुं षोडशस्यारम्भः ।

अत्र दैवीं सम्पदं भगवान् उवाच अभयम् इत्यादिना त्रिकेण ।चतुर्णाम् आश्रमाणां वर्णानां च धर्माः क्रमादिह कथ्यन्ते ।सन्न्यासिनां तावदाह अभयं निरुद्यमः कथम् एकाकी जिविष्यामीति भयशून्यत्वम् । सत्त्वसंशुद्धिः स्वाश्रमधर्मानुष्ठानेन मनोनैर्मल्यम् ।ज्ञानयोगे श्रवणादौ ज्ञानोपाये ।व्यवस्थितिः परिनिष्ठेति त्रयम् ॥

अथ ब्रह्मचारिणामाह स्वाध्यायो ब्रह्मयज्ञः शक्तिमतो भगवतः प्रतिपादकोऽयम् अपौरुषेयोऽक्षरराशिर् इत्यनुसन्धाय वेदाभ्यासनिष्ठतेत्येकम् ।

अथ वानप्रस्थानामाह तप इति ।तच् च शरीरादित्रिभेदम् इत्यष्टादशे वक्ष्यमाणं बोध्यम् इत्येकम् ।

अथ वर्णेषु विप्राणामाह आर्जवं सारल्यम् ।तच् च श्रद्धालुश्रोतृषु स्वज्ञातार्थागोपनं ज्ञेयम् ।अहिंसा प्राणिजीविकानुच्छेदकता ।सत्यम् अन्नथान् अनुभन्दियथादृष्टार्थविषयं वाक्यम् ।अक्रोधो दुर्जनकृते स्वतिरस्कारेऽभ्युदितस्य कोपस्य निरोधः । त्यागो दुरुक्तेर् अपि तत्राप्रकाशः । शान्तिर् मनसः संयमः । अपैशुनं परोक्षे परानर्थकारिवाक्याप्रकाशनम् ।भूतेषु दया तद्दुःखासहिष्णुता ।अलोलुप्त्वं निर्लोभिता ।पलोपश्छान्दसः ।मार्दवं कोमलत्वम् सत्पात्रसङ्गविच्छेदासहनम् ।ह्रीर् विकर्मणि लज्जा ।अचापलं व्यर्थक्रियाविरह इति द्वादश ।

अथ क्षत्रियाणामाह तेजस्तुच्छजनानभिभाव्यत्वम् ।क्षमा सत्यपि सामर्थ्येस्वासमानं परिभावकं प्रति कोपानुदयः । धृतिः शरीरेन्द्रियेष्वपि तदुत्तम्भकः प्रयत्नो येन तेषां नावसादः स्यादिति त्रयम् ।

अथ वैश्यानामाह शौचं व्यापारे वाणिज्ये मायान्टादिराहित्यम् ।अद्रोहः परजिघांसया खड्गाद्यग्रहणम् इति द्वयम् ।

अथ शूद्रानामाह नातिमानिता आत्मनि पूज्यत्वभावनाशून्यता विप्रादिषु त्रिषु नम्रतेत्येकम् इति षड्विंशतिः ।

एते तत्र तत्र प्रधानभूता बोध्या अनुक्तानाम् अप्युपलक्षणार्थाः ।देहारम्भकालोन्मुखैः सुकृतैर् व्यक्तां दैवीं शुभवासनाम् अभिलक्षीकृत्य जातस्य पुरुषस्य भवन्ति उदयन्ते पुण्यः पुण्ये कर्मणा भवति पापः पापेन इति श्रुतेः ।देवाह् खलु परेशानुवृत्तिशीलास्तेषाम् इयं सम्पदनया तत्प्रापकज्ञानभक्तिसम्भवात् संसारतरोर् उपादेयं फलम् एतत् ॥१-३ ॥

**दम्भो दर्पोऽतिमानश्च क्रोधः पारुष्यम् एव च ।**
**अज्ञानं चाभिजातस्य पार्थ संपदम् आसुरीम् ॥४ ॥**

**श्रीधर**: आसुरीं सम्पदम् आह दम्भ इति । दम्भो धर्मध्वजित्वम् । दर्पो धनविद्यादिनिमित्तश्चित्तस्योत्सेकः । अभिमानः पूर्वोक्तः । क्रोधश्च ।पारुष्यम् एव च परुषवचनम् । यथा काणं चक्षुष्मान् विरूपं रूपवान् हीनाभिजनम् उत्तमाभिजन इत्यादि । अज्ञानं च अविवेकज्ञानं मिथ्याप्रत्ययः कर्तव्याकर्तव्यादिविषयः । अभिजातस्य पार्थ किम् अभिजातस्येति । आह आसुरानां सम्पदासुरी ।ताम् अभिजातस्येत्यर्थः ॥४ ॥

**विश्वनाथ**: बन्धकानि फलान्याह दम्भः स्वस्याधर्मिकत्वेऽपि धार्मिकत्वप्रख्यापनम् ।दर्पो धनविद्यादिहेतुको गर्वोऽभिमानोऽन्यकृतसम्माननाकाङ्क्षितत्वं कलत्रपुत्रादिष्वासक्तिर् वा ।क्रोधः प्रसिद्धः । पारुष्यं निष्ठुरता ।अज्ञानम् अविवेकः । आसुरीम् इत्युपलक्षणं राक्षसीम् अपि सम्पदम् अभिजातस्य राजस्यास्तामसस्यश्च सम्पदः प्राप्तिसूचकक्षणे जन्म लब्धवतः पुंस एतानि दम्भादीनि भवन्तीत्यर्थः ॥४ ॥

**बलदेव**: अथ नरकहेतुम् आसुरीं सम्पदम् आह दम्भ इत्येकेन । दम्भो धार्मिकत्वख्यातये धर्मानुष्ठानम् ।दर्पो विद्याभिजनजन्यो गर्वः ।स्वस्मिन्न् अभ्यर्चत्वबुद्धिः । क्रोधः प्रसिद्धः । पारुष्यम् प्रत्यक्षं रुक्षभाषितम् । चकारश्चापलादेः समुच्चायकः ।अज्ञानं कार्याकार्यविवेकधीशून्यत्वम् ।चकारोऽधृत्यादेः समुच्चायकः ।एते देहारम्भकालोन्मुखैर् दुष्कृतैर् व्यक्ताम् आसुरीम् अशुभवासनाम् अभिलक्ष्य जातस्य पुरुषस्य भवन्ति ।पापः पापेन इति श्रुतिः ॥४ ॥

**दैवी संपद्विमोक्षाय निबन्धायासुरी मता ।**
**मा शुचः संपदं दैवीम् अभिजातोऽसि पाण्डव ॥५ ॥**

**श्रीधर**: एतयोः सम्पदोः कार्यं दर्शयन्न् आह दैवीति ।दैवी वा सम्पत् तया युक्तो मयोपदिष्टे तत्त्वज्ञानेऽधिकारी ।आसुर्या सम्पदा युक्तस्तु नित्यं संसारीत्यर्थः

। एतच् छ्रुत्वा किम् अहम् अत्राधिकारी न वेति सन्देह्व्याकुलचित्तम् अर्जुनम् आश्वासयति हे पाण्डव मा शुचः शोकं मा कार्षीः । यतस्त्वं दैवीं सम्पदभिजातोऽसि ॥ ५ ॥

**विश्वनाथ**: एतयोः सम्पदोः कार्यं दर्शयति दैवीति । हन्त हन्त शर्प्रहारैर् बन्धून् जिघंसोः पारुष्यक्रोधादिमतो ममैवेयम् आसुरीसम्पत् संसारबन्धप्रापिका दृश्यत इति खिद्यन्तम् अर्जुनम् आश्वासयति मा शुचः इति । पाण्डवेति तव क्षत्रियकुलोत्पन्नस्य सङ्ग्रामे पारुष्यक्रोधाद्या धर्मशास्त्रे विहिता एव । तदन्यत्रैव ते हिंसाद्या आसुरी सम्पदिति भावः ॥ ५ ॥

**बलदेव**: एतयोः सम्पदोः फलभेदम् आह दैवीत्यर्धकेन स्फुटम् । बाणवृष्ट्या पूज्या द्रोणादीन् जिघंसोः क्रोध पारुष्यवतो ममेयम् आसुरी सम्पत् नरकं जनयेदिति शोचयन्तं पार्थम् आलक्षाह मा शुच इति । हे पाण्डवेति क्षत्रियस्य ते युद्धे बाणनिक्षेपपारुष्यादिकं विहितत्वात् दिअव्येव सम्पत् ततोऽन्यत्र त्वासुरीति मा शुचः शोकं मा कुरु ॥ ५ ॥

द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च ।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥ ६ ॥

**श्रीधर**: आसुरी सम्पत् सर्वात्मना वर्जयितव्येत्येतदर्थम् आसुरीं सम्पदं प्रपञ्चयितुम् आह द्वाविति । द्वौ द्विप्रकारौ भूतानां सर्गौ मे सद्वचनात् शृणु । आसुर राक्षसप्रकृत्योर् एकीकरणेन द्वावित्युक्तम् । अतो राक्षसीम् आसुरीं चैव प्रकृतिं मोहिनीं श्रिता इत्यादिना नवाध्यायोक्तप्रकृतित्रैविध्येनाविरोधः । स्पष्टम् अन्यत् ॥ ६ ॥

**विश्वनाथ**: तदपि विषण्णम् अर्जुनं प्रत्यासुरीं सम्पदं प्रपञ्चयितुम् आह द्वाविति । विस्तरशः प्रोक्त इत्यभयः सत्त्वसंशुद्धिर् इत्यादि ॥ ६ ॥

**बलदेव**: तथाप्यनिवृत्तशोकं तम् आलक्ष्य आसुरीं सम्पदं प्रपञ्चयति द्वाविति । अस्मिन् कर्माधिकारिणि मनुष्यलोके द्विव्धौ भूतसर्गौ मनुष्यसृष्टी भवतः । यदायं मनुष्यलोके शास्त्रात् स्वाभाविकौ रागद्वेषौ विनिर्धूय शास्त्रीयार्थानुष्ठायी तदा दैवः । यदा शास्त्रम् उत्सृज्य स्वाभाविकरागद्वेषाधीनोऽशास्त्रीयान् धर्मान् आचरति, तदा त्वासुरः । न हि धर्माधर्माभ्याम् अन्या कोटिसृतीयास्ति । श्रुतिश्चैवम् आह द्वया ह प्राजपत्या देवाश्चासुराश्च इत्य् [ब्. आ. उ. १.३.१] आदिना । तत्र दैवो विस्तरशः प्रोक्तः अभयम् इत्यादिना । अथासुरं शृणु विस्तरशो वक्ष्यामि ॥ ६ ॥

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥ ७ ॥

**श्रीधरः** आसुरीं विस्तरशो निरूपयति प्रवृत्तिं चेत्यादिद्वादशभिः । धर्मे प्रवृत्तिम् अधर्मान् निवृत्तिं चासुरस्वभावा जना न जानन्ति । अतः शौचम् आचारः सत्यं च तेषु नास्त्येव ॥ ७ ॥

**विश्वनाथः** धर्मे प्रवृत्तिम् अधर्मान् निवृत्तिम् ॥ ७ ॥

**बलदेवः** आसुरं सर्गम् आह प्रवृत्तिं चेति द्वादशभिः । आसुरा जना धर्मे प्रवृत्तिम् अधर्मान् निवृत्तिम् च न जानन्ति । चकाराभ्यां तयोः प्रतिपादके विधि-निषेधवाक्ये च न जानन्ति । वेदेष्वास्थाभावादित्युक्तम् । तेषु शौचं बाह्याभ्यन्तरं तत्प्रवृत्त्युपयोगि न विद्यते । नाप्याचारो मन्वादिभिर् उक्तः । न च सत्यं प्राणिहितानुबन्धि यथादृष्टार्थविषयवाक्यम् इति गृध्रगोमायुवत् तेषाम् उपदेशादि ॥ ७ ॥

असत्यम् अप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
अपरस्परसंभूतं किम् अन्यत् कामहैतुकम् ॥ ८ ॥

**श्रीधरः** ननु वेदोक्तयोर् धर्माधर्मयोः प्रवृत्तिं निवृत्तिं च कथं न विदुः । कुतो वा धर्माधर्मयोर् अनङ्गीकारे जगतः सुखदुःखादिव्यवस्था स्यात् । कथं वा शौचाचारादिविषयान् ईश्वराज्ञान् अतिवर्तेरन् । ईश्वरानङ्गीकारे च कुतो जगदुत्पत्तिः स्यात् । अत आह असत्यम् इति । नास्ति सत्यं वेदपुराणादिप्रमाणं यस्मिन् तादृशं जगदाहुः । वेदादीनां प्रामाण्यं न मन्यन्त इत्यर्थः । तदुक्तं त्रयो वेदस्य कर्तारो भण्डधूर्तनिशाचरा इत्यादि ॥ अतएव नास्ति धर्माधर्मरूपा प्रतिष्ठा व्यवस्थाहेतुर् यस्य तत् । स्वाभाविकं जगद्वैचित्र्यम् आहुर् इत्यर्थः । अतएव नास्ति ईश्वरः कर्ता व्यवस्थापकश्च यस्य तादृशं जगदाहुः । तर्हि कुतोऽस्य जगत उत्पत्तिं वदन्तीति । अत आह अपरस्परसम्भूतम् इति । अपरश्चेत्यपरस्परम् । अपरस्परतोऽनोन्यतः स्त्रीपुरुषयोर् मिथुनात् सम्भूतं जगत् । किम् अन्यत् । कारणम् अस्य नास्ति अन्यत् किञ्चित् । किन्तु कामहैतुकम् एव । स्त्रीपुरुषयोर् उभयोः काम एव प्रवाहरूपेण हेतुर् अस्येत्याहुर् इत्यर्थः ॥ ८ ॥

**विश्वनाथः** असुराणां मतम् आह असत्यं मिथ्याभूतं भ्रमोपलब्धम् एव जगत् ते वद्वैत् । अप्रतिष्ठं प्रतिष्ठाश्रयस्तद्रहितम् । न हि खपुष्पस्य किञ्चिदधिष्ठानम् अस्तीति भावः । अनीश्वरं मिथ्याभूतत्वादेव ईश्वरकर्तृकम् एतन् न भवति । स्वेदजादीनाम्

अकस्मादेव जातत्वात् अपरस्परसम्भूतम् । अन्यत् किं वक्तव्यम् । कामहैतुकम् कामो वादिनाम् इच्छैव हेतुर् यस्य तत् । मिथ्याभूतत्वादेव ये यथा कल्पयितुं शक्नुवन्ति तथिअवैतदिति ।

केचित् पुनर् एवं व्याचक्षते असत्यं नास्ति सत्यं वेदपुराणादिकं प्रमाणं यत्र तत् । तदुक्तं त्रयो वेदस्य कर्तारो भण्डधूर्तनिशाचरा इत्यादि । अप्रतिष्ठं नास्ति धर्माधर्मरूपा प्रतिष्ठा व्यवस्था यत्र तत् । धर्माधर्मावपि भ्रमोपलब्धाविति भावः । अनीश्वरम् ईश्वरोऽपि भ्रमेणोपलभ्यत इति भावः ।

ननु स्त्रीपुंसयोः परस्परप्रयत्नविशेषाद्जगदेतदुत्पन्नं दृश्यत इत्यपि भ्रम एव कुलालस्य घटोत्पादने ज्ञानम् इव मातापित्रोस्तादृशबालोत्पादने किल नास्ति ज्ञान्म् इति भावः । किम् अन्यत् किम् अन्यत् वक्तव्यम् इति भावः । तस्मादिदं जगत् कामहेतुकं कामेन स्वेच्छयैव हेतुका हेतुकल्पका यत्र तत् । युक्तिबलेन ये यत् परमाणुमायेश्वरादिकं जल्पयितुं शक्नुवन्ति ते तदेव तस्य हेतुं वदन्तीत्यर्थः ॥ ८ ॥

**बलदेव**: तेषां सिद्धान्तान् दर्शयति तत्रैकजीववादिनाम् आह असत्यम् इति । इदं जगदसत्यं शुक्तिरजतादिवद्भ्रान्तिविजृम्भितम् । अप्रतिष्ठं खपुष्पवन् निराश्रयम् । नास्त्येवेश्वरो जन्मादिहेतुर् यस्य तत् । सोऽपि तद्वद्भ्रान्तिरचित एव । पारमार्थिके तस्मिन् स्थिते तन् निर्मितजगत् तद्वद्दृष्टनष्टप्रायं न स्यात् । तस्मादसत्यं जगत् त एव मन्यन्ते । एकैव निर्विशेषो सर्वप्रमाणावेद्या चिद्भ्रमादेको जीवस्ततोऽन्यज् जड-जीवेश्वरात्मकं तदज्ञानात् प्रतिभाषते । आस्वरूपसाक्षात्कारादविसंवादि स्वाप्निकम् इव हस्त्यश्वरथादिकम् आजागरात् । सति च स्वरूपसाक्षात्कारे तदज्ञानकल्पितं तज्जीवत्वेन सह निवर्तेत स्वाप्निकरथाशादीव सुषुप्ताविति ।

अथ स्वभाववादिनां बौद्धानाम् आह अपरस्परसम्भूतम् इति स्त्रीपुरुषसम्भोग-जन्यं जगन् न भवति घटोत्पादने कुलालस्येव बालोत्पादने पित्रादेर् ज्ञानाभावात् सत्यप्यसकृत् सम्भोगे सन्तानान् उत्पत्तेश्च स्वेदजादीनाम् अकस्मादुत्पत्तेश्च । तस्मात् स्वभावादेवेदं भवतीति ।

अथ लोकायतिकानाम् आह कामहेतुकम् इति । किम् अन्यद्वाच्यम् । स्त्रीपुरुषयोः काम एव प्रवाहात्मना हेतुर् अस्येति स्वार्थे ठञ् । अथवा जैनानाम् आह कामः स्वेच्छयैव हेतुर् अस्येति । युक्तिबलेन यो यत् कल्पयितुं शक्नुयात् स तदेव तस्य हेतुं वदतीत्यर्थः ॥ ८ ॥

**एतां दृष्टिम् अवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।**
**प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥ ९ ॥**

**श्रीधरः** किं च एताम् इति । एतां लोकायतिकानां दृष्टिं दर्शनम् आश्रित्य नष्टात्मनो मलीमसचित्ताः सन्तोऽल्पबुद्धयो दुष्टार्थमात्रमतयः । अतेव उग्रं हिंस्रं कर्म येषां ते अहिता वैरिणो भूत्वा जगतः क्षयाय प्रभवन्ति उद्भवन्तीत्यर्थः ॥ ९ ॥

**विश्वनाथः** एवं वादिनोऽसुराः केचिन् नष्टात्मानः केचिदल्पज्ञानाः केचिदुग्रकर्माणः स्वच्छन्दाचारा महानारकिनो भवन्तीत्याह । एताम् इत्येकादशभिः । अवष्टभ्य आलम्ब्य ॥ ९ ॥

**बलदेवः** स्वस्वमतनिर्णायकानि दर्शनानि च तैः कृतानि यान्यास्थाय जगद्विनश्यतीत्याह एताम् इति जात्यैकवचनम् । एतानि दर्शनान्यवष्टभ्यालम्ब्याल्पबुद्धयो नष्टात्मानोऽदृष्टदेहादिविविक्तात्मतत्त्वा उग्रकर्माणो हिंसापैशुन्यपारुष्यादिकर्मनिष्ठा जगतोऽहिताः शत्रवश्च सन्तस्य क्षयाय प्रभवन्ति पर्मार्थाज् जगद्भ्रंशयन्तीत्यर्थः ॥ ९ ॥

**कामम् आश्रित्य दुष्पूरं दम्भमानमदान्विताः ।**
**मोहाद्गृहीत्वासद्ग्राहान् प्रवर्तन्तेऽशुचिव्रताः ॥ १० ॥**

**श्रीधरः** अपि च कामम् आश्रित्येति । दुष्पूरं पुरयितुम् अशक्यं कामम् आश्रित्य दम्भादिभिर् युक्ताः सन्तः क्षुद्रदेवताराधनादौ प्रवर्तन्ते । कथम् । असद्ग्राहान् गृहीत्वा अनेन मन्त्रेणैतां देवताम् आराध्य महानिधीन् साधयिष्याम इत्यादीन् दुराग्रहान् मोहमात्रेण स्वीकृत्य प्रवर्तन्ते । अशुचिव्रताः अशुचीनि मद्यमांसादिविषयीणि व्रतानि येषां ते ॥ १० ॥

**विश्वनाथः** असद्ग्राहान् प्रवर्तन्ते कुमते एव प्रवृत्ता भवन्ति । अशुचीनि शौचाचारवर्जितानि व्रतानि येषां ते ॥ १० ॥

**बलदेवः** अथ तेषां दुर्वृत्ततां दुराचारतां चाह कामम् इति । दुष्पूरं कामं विषयतृष्णाम् आश्रित्य मोहान् न तु शास्त्रादसद्ग्राहान् गृहीत्वाशुचिव्रताः सन्तः प्रवर्तन्ते । असद्ग्राहान् दुष्टनक्रवदात्मविनाशकान् कल्पितदेवतातन्मन्त्रतदाराधननिमित्तककामिनीपार्थिवनिध्याकर्षणरूपान् दुराग्रहान् इत्यर्थः । अशुचीनि श्मशाननिषेवणमद्यमांसविषयाणि व्रतानि येषां ते । दम्भेनाधरिष्ठत्वेऽपि धर्मिष्ठत्वख्यापनेन मानेनापूज्यत्वेऽपि पूज्यत्वं ख्यापनेन मदेनाअनुत्कृष्टत्वेऽप्युत्कृष्टत्वारोपणेन चान्विताः ॥ १० ॥

**चिन्ताम् अपरिमेयां च प्रलयान्ताम् उपाश्रिताः ।**
**कामोपभोगपरमा एतावदिति निश्चिताः ॥ ११ ॥**

**श्रीधर**: किं च चिन्ताम् इति । प्रलयो मरणम् एवान्तो यस्यास्ताम् अपरिमेयां परिमातुम् अशक्यां चिन्ताम् आश्रिताः । नित्यं चिन्तापरा इत्यर्थः । कामोपभोग एव परमो येषां ते । एतावदिति कामोपभोग एव परमः पुरुषार्थो नान्यदस्तीति कृतनिश्चयाः । अर्थसञ्चयान् ईहन्तु इत्युत्तरेणान्वयः । तथा च बार्हस्पत्यं सूत्रं काम एवैकः पुरुषार्थ इति । चैतन्यविशिष्टः कामः पुरुष इति च ॥ ११ ॥

**विश्वनाथ**: प्रलयान्तां प्रलयो मरणं तत्पर्यन्ताम् । एतावदिति इन्द्रियाणि विषयसुखे मज्जन्तु नाम का चिन्ता इत्येतावदेव शास्त्रार्थतात्पर्यम् इति निश्चितं येषां ते ॥ ११-१५ ॥

**बलदेव**: अपरिमेयाम् अपरा प्रलयान्तां च मरणकालावधिसाध्यवस्तुविषयां चिन्ताम् उपाश्रितः कामोपभोगः सम्यग्विषयसेवैव परमः पुमर्थो येषां ते । एतावदेव कामोपभोगमात्रम् एवैहिकम् । न त्वतोऽन्यत् पारलौकिकं सुखम् अस्तीति कृतनिश्चयाः ॥ ११ ॥

**आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।**
**ईहन्ते कामभोगार्थम् अन्यायेनार्थसंचयान् ॥ १२ ॥**

**श्रीधर**: अतएव आशेति । आशा एव पाशाः । तेषां शतैर् बद्धा इतस्तत आकृष्यमाणाः । कामक्रोधपरायणाः कामक्रोधौ परमयनाश्रयो येषां ते । कामभोगार्थम् अन्यायेन चौर्यादिनार्थानां सञ्चयान् राशीन् ईहन्त इच्छन्ति ॥ १२ ॥

**बलदेव**: आशेति स्पष्टम् । ईहन्ते कर्तुं चेष्टन्ते अन्यायेन कूटसाक्ष्येण चौर्येण च ॥ १२ ॥

**इदम् अद्य मया लब्धम् इदं प्राप्स्ये मनोरथम् ।**
**इदम् अस्तीदम् अपि मे भविष्यति पुनर्धनम् ॥ १३ ॥**

**श्रीधर**: तेषां मनोरथं कथयन् नरकप्राप्तिम् आह इदम् अद्य मयेति चतुर्भिः । प्राप्स्ये प्राप्स्यामि । मनोरथं मनसः प्रियम् । स्पष्टम् अन्यत् । एतेषां च त्रयाणां श्लोकानाम् इत्यज्ञानविमोहिताः सन्तो नरके पतन्तीति चतुर्थेनान्वयः ॥ १३ ॥

**बलदेव**: तेषां धनाशानुवृत्तिं मनोराज्योक्त्या विवृण्वन् नरकनिपातम् आह इदम् इति चतुर्भिः । इदं क्षेत्रं पशुपुत्रादि मयैवाद्य स्वधीबलेन लब्धम् । इमं मनोरथं मनःप्रियम् अर्थम् अहम् एव स्वबलेन प्राप्स्यामि, स्वबलेनैव लब्धम् इदं धनं मम

सम्प्रत्यस्ति ।इदम् इष्यमाणं धनम् आगामिवर्षे मद्बलेनैव मे भविष्यति ।न त्वदृष्टबलेन ईश्वरप्रसादेन वेत्यर्थः ।एवं धनतृष्णां प्रपञ्च्य दुष्टं भावं प्रपञ्चयति असाविति । यज्ञदत्ताख्योऽसौ शत्रुर् मयातिबलिना हतः । अपरान् अपि शत्रून् अहम् एव हनिष्यामि । तेषां दारधनादि च नेष्यामीति चशब्दात् मत्तो न कोऽपि जीवेदिति भावः । नन्वीश्वरेच्छाम् अदृष्टं च केचिज् जयहेतुम् आहुस्तत्राहाहम् एवेश्वरः स्वतन्त्रो यदहं भोगी स्वतो निखिलभोगसम्पन्नः सिद्धोऽस्मीति । यदि कश्चिदीश्वरं कल्पयति ।तर्हि स माम् एवेश्वरं कल्पयतु न तु मत्तोऽन्यम् अनुपलब्धेर् इति भावः ॥१३ ॥

**असौ मया हतः शत्रुर्हनिष्ये चापरान् अपि ।**
**ईश्वरोऽहम् अहं भोगी सिद्धोऽहं बलवान् सुखी ॥१४ ॥**

**श्रीधर**: असाविति ।सिद्धः कृतकृत्यः ।स्पष्टम् अन्यत् ॥१४ ॥

**आढ्योऽभिजनवान् अस्मि कोऽन्योऽस्ति सदृशो मया ।**
**यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥१५ ॥**

**श्रीधर**: किं च आढ्य इति ।आढ्यो धनादिसम्पन्नः ।अभिजनवान् कुलीनः । यक्ष्ये यागाद्यनुष्ठानेनापि दीक्षितान्तरेभ्यः सकाशान् महतीं प्रतिष्ठां प्राप्स्यामि । दास्यामिस्तावकेभ्यः । मोदिष्ये हर्षं प्राप्स्यामि इत्येवम् अज्ञानेन विमोहिता मिथ्याभिनिवेशं प्रापिताः ॥१५ ॥

**बलदेव**: ननु सम्पदा कुलेन चान्ये त्वत्समा वीक्ष्यन्ते तत् कथम् ईश्वरस्त्वम् इति चेदाह आढ्यः सम्पन्नः स्वतोऽहम् अस्म्यभिजनवान् कुलीनश्च ।न तु केनचिन् निमित्तेनातो मत्सदृशोऽन्यः कोऽस्ति ।न कोऽपीत्यहम् एवेश्वरः ।अतोऽहं त्वबलेनैव यक्ष्ये दिव्याङ्गनानां सङ्गतिः करिष्ये । दास्यामि । तासाम् अधरादि खण्डयिषाम्येव मोहिष इत्यज्ञानविमोहिताः सन्तो नरके पतन्तीत्यग्रिमेणान्वयः । अनेकेषु चिरप्रयाससाध्येषु वस्तुष्यच् चित्तं तेन विभ्रान्ता विक्षिप्ता मोहमयेन जालेन समावृता मत्स्या इव ततो निर्गन्तुक्षमाः । कामभोगेषु प्रसक्ता मध्ये मृताः सन्तो नरके पतन्त्यशुचौ वैतरण्यादौ ॥१५-१६ ॥

**अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।**
**प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥१६ ॥**

**श्रीधर**: एवम्भूता यत् प्राप्नुवन्ति तच् छृणु अनेकेति । अनेकेषु मनोरथेषु प्रवृत्तं चित्तम् अन्केचित्तम् । तेन विभ्रान्ता विक्षिप्ताः । तेनैव मोहमयेन जालेन समावृताः । मत्स्या इव सूत्रमयेन जालेन यन्त्रिताः । एवं कामभोगेषु प्रसक्ता अभिनिविष्टा सन्तोऽशुचौ कल्मषे नरके पतन्ति ॥ १६ ॥

**विश्वनाथ**: अशुचौ नरके वैतर्ण्यादौ ॥ १६ ॥

> आत्मसंभाविताः स्तब्धा धनमानमदान्विताः ।
> यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥ १७ ॥

**श्रीधर**: यक्स्य इति च यस्तेषां मनोरथ उक्तः स केवलं दम्भाहङ्कारादिप्रधान एव न तु सात्त्विक इत्यभिप्रायेणाह आत्मेति द्वाभ्याम् । आत्मनैव सम्भाविताः पूज्यतां नीताः । न तु साधुभिः कैश्चित् । अतएव स्तब्धा अनम्राः । धनेन यो मनोमदश्च ताभ्यां समन्विताः सन्तस्ते । नाममात्रेण ये यज्ञास्ते नामयज्ञाः । यद्वा दीक्षितः सोमयाजीत्येवम् आदि नाममात्रप्रसिद्धये ये यज्ञास्तैर् यजन्ते । कथम् । दम्भेन । न तु श्रद्धया । अविधिपूर्वकं च यथा भवति तथा ॥ १७ ॥

**विश्वनाथ**: आत्मनैव सम्भाविताः पूज्यतां नीता न तु साधुभिः कैश्चिदित्यर्थः । अतएव स्तब्धा अनम्राः । नाममात्रेणैव ये यज्ञास्ते नामयज्ञास्तैः ॥ १७ ॥

**बलदेव**: आत्मनैव सम्भाविताः श्रैष्ठ्यं नीताः । न तु शास्त्रज्ञैः सद्भिः । स्तब्धाः अनम्राः । धनेन सम्पदा मानेन च परमहंसो महाश्रमणः श्रीपूज्यपादो महापूजाविदित्येवं लक्षणेन स्सत्कारेण यो मदो गर्वस्तेनान्विताः । नामयज्ञैर् नाममात्रेण यज्ञैः पूजाविधिभिः स्वकल्पिता देवता यजन्ते स्वस्वकानां गृहिणाम् अभ्युदयाय दम्भेन धर्मध्वजित्वेन विशिष्टा विरक्तवेशाः सन्त इत्यर्थः । अविधिपूर्वकम् अवेदविहितं यथा भवति तथा ॥ १७ ॥

> अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
> माम् आत्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥ १८ ॥

**श्रीधर**: अविधिपूर्वकत्वम् एव प्रपञ्चयति अहङ्कारम् इति । अहङ्कारादीन् संश्रिताः सन्तः आत्मपरदेहेष्वात्मदेहेषु परदेहेषु च चिदंशेन स्थितं मां प्रद्विषन्तो यजन्ते । दम्भयज्ञेषु श्रद्धाया अभावादात्मनो वृथैव पीडा भवति । तथा पश्वादीनाम् अप्यविधिना हिंसायां चैतन्यद्रोह एवावशिष्यत इति प्रद्विषन्त इत्युक्तम् । अभ्यसूयकाः सन्मार्गवर्तिनां गुणेषु दोषारोपकाः ॥ १८ ॥

**विश्वनाथ**: मां परमात्मानम् अमानयन्त एव प्रद्विषन्तः । यद्वा आत्मपराः परमात्मपरायणाः साधवस्तेषां देहेषु स्थितं मां प्रद्विषन्तः साधुदेहद्वेषादेव मद्द्वेष इति भावः । अभ्यसूयकाः साधूनां गुणेषु दोषारोपकाः ॥ १८ ॥

**बलदेव**: सर्वथा वेदतत्प्रतिपाद्येश्वरावमन्तराच् त इत्याह अहङ्कारम् इति । अहङ्कारादीन् संश्रितास्ते आत्मनः परेषां च देहेषु नियामकतया भर्तृतया चावस्थितं मां सर्वेश्वरं मद्विषयकं वेदं च प्रद्विषन्तोऽवज्ञयाकुर्वन्तो भवन्ति । अभ्यसूयकाः कुटिलयुक्तिभिर् मम वेदस्य च गुणेषु दोषान् आरोपयन्तः । अहम् एव स्वतन्त्रः करोमीत्यहङ्कारः । अहम् एव पराक्रमीति बलम् । मत्तुल्यो न कोऽप्यस्तीति दर्पः । मदिच्छैव सर्वसाधिकेति कामः । मत्प्रतीपम् अहम् एव हनिष्यामीति क्रोधश्च ॥ १८ ॥

तान् अहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रम् अशुभान् आसुरीष्वेव योनिषु ॥ १९ ॥

**श्रीधर**: तेषां च कदाचिदपि आसुरस्वभावप्रच्युतिर् न भवतीत्याह तान् इति द्वाभ्याम् । तान् अहं द्विषतः क्रूरान् संसारेषु जन्ममृत्युमार्गेषु तत्राप्यासुरीष्वेवातिक्रूरासु व्याघ्रसर्पादियोनिषु अजस्रम् अनवरतं क्षिपामि । तेषां पापकर्मणां तादृशं फलं ददामीत्यर्थः ॥ १९ ॥

**बलदेव**: एषाम् आसुरस्वभावान् क्वचिदपि विमोक्षो न भवतीत्याह तान् इति द्वाभ्याम् । आसुरीष्वेव हिंसातृष्णादियुक्तासु म्लेच्छव्याधयोनिषु तत्तत्कर्मानुगुणफलदः सर्वेश्वरोऽहम् अजस्रं पुनः पुनः क्षिपामि ॥ १९ ॥

आसुरीं योनिम् आपन्ना मूढा जन्मनि जन्मनि ।
माम् अप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥ २० ॥

**श्रीधर**: किं च आसुरीम् इति । ते च माम् अप्राप्यैव इति एवकारेण मत्प्राप्तिशङ्कापि कुतस्तेषाम् । मत्प्राप्त्युपायं सन्मार्गम् अप्राप्य ततोऽप्यधमां कृमिकीटादियोनिं यान्तीत्युक्तम् । शेषं स्पष्टम् ॥ २० ॥

**विश्वनाथ**: माम् अप्राप्यैवेति न तु मां प्राप्येति । वैवस्वतमन्वन्तररीयाष्टाविंशचतुर्युगद्वापरान्तेऽवतीर्णं मां कृष्णं कंसादिरूपास्ते प्राप्य प्रद्विषन्तोऽपि मुक्तिम् एव प्राप्नुवन्तीति भक्तिज्ञानपरिपाकतो लभ्याम् अपि मुक्तिं तादृशपापिभ्योऽप्यहम् अपारकृपासिन्धुर् ददामि । निभृतमरुन्मनोऽक्ष दृढयोगयुजो हृदि यन् मुनय उपासते तदरयोऽपि ययुः स्मरणात् इति श्रुतयोऽप्याहुः । अतः पूर्वोक्ता ममैव सर्वोत्कर्षो वरीवर्तीति भागवतामृतकारिका यथा:

मां कृष्णरूपिणं यावन् नाप्नुवन्ति मम द्विषः ।
तावदेवाधमं योनिं प्राप्नुवन्तीति हि स्फुटम् ॥ इति [ल.भाग्. १.५.८३]

**बलदेव**: ननु बहुजन्मान्ते तेषां कदाचित् त्वदनुकम्पयासुरयोनेर् विमुक्तिः स्यादिति चेत् तत्राह आसुरीम् इति । ते मूढा जन्मन्यासुरीं योनिम् आपन्ना माम् अप्राप्यैव ततोऽप्यधमाम् अतिनिकृष्टां श्वादियोनिं यान्ति । माम् अप्राप्यैव अत्र एवकारेण मदनुकम्पायाः सम्भावनापि नास्ति । तल्लाभोपाययोग्या सज्जातिर् अपि दुर्लभेति । श्रुतिश्चैवम् आह अथ कपूयचरणा अभ्यासो ह यत् ते कपूयां योनिम् आपद्येरन् श्वयोनिं वा शूकरयोनिं वा चण्डालयोनिं वा इत्यादिका ।

नन्वीश्वरः सत्यसङ्कल्पत्वादययोग्यस्यापि योग्यतां शक्नुवात् कर्तुम् इति चेत्, शक्नुयादेव । यदि सङ्कल्पयेत् बीजाभावान् न सङ्कल्पयतीत्यतस्तस्या वैषम्यमाह सूत्रकारः वैषम्यनैर्घृण्येन इत्यादिना [वे. सू. २.१.३५] । ततश्च तान् अहम् इत्यादिद्वयं सूपपन्नम् । एते नास्तिकाः सर्वदा नारकिनो दर्शिताः । ये तु शापादसुरास्तदनुयायिनश्च राजन्याः प्रत्यक्षे उपेन्द्रनृहरिवराहादौ विष्णौ स्वशत्रुपक्षत्वेन विद्वेषिणोऽपि वेदवैदिककर्मपराः सर्वनियन्तारं कालशक्तिकम् अप्रत्यक्षं सर्वेश्वरं मन्यन्ते । ते तूपेन्द्रादिभिर् निहताः क्रमात् त्यजन्त्यासुरीयोनिम् । कृष्णेन निहतास्तु विमुच्यन्ते चेति । न ते वेद बाह्याः ॥ २० ॥

**त्रिविधं नरकस्येदं द्वारं नाशनम् आत्मनः ।**
**कामः क्रोधस्तथा लोभस्तस्मादेतत् त्रयं त्यजेत् ॥ २१ ॥**

**श्रीधर**: उक्तानाम् आसुरदोषाणां मध्ये सकलदोषमूलभूतं दोषत्रयं सर्वथा वर्जनीयम् इत्याह त्रिविधम् इति । कामः क्रोधो लोभश्चेति इदं त्रिविधं नरकस्य द्वारम् । अत एवात्मनो नाशनं नीचयोनिप्रापकम् । तस्मादेतत् त्रयं सर्वात्मना त्यजेत् ॥ २१ ॥

**विश्वनाथ**: तदेवम् आसुरीः समस्तीर् विस्तार्य प्रोक्ता इतस्ततः साधूक्तम् मा शुचः सम्पदं दैवीम् अभिजातोऽसि भारत इति । किं वासुराआम् एतत् त्रिकम् एव स्वाभाविकम् इत्याह त्रिविधम् इति ॥ २१ ॥

**बलदेव**: नन्वासुरीं प्रकृतिं नरकहेतुं श्रुत्वा ये मनुष्यास्तां परिहर्तुम् इच्छन्ति । तैः किम् अनुष्ठेयम् इति चेत् तत्राह त्रिविधम् इति । एतत्त्रयपरिहारे तस्याः परिहारः स्यादित्यर्थः ॥ २१ ॥

एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः ।
आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥ २२ ॥

**श्रीधरः** त्यागे च विशिष्टं फलम् आह एतैर् इति । तमसो नरकस्य द्वारभूतैर् एतैस्त्रिभिः कामादिभिर् विमुक्तो नर आत्मनः श्रेयः साधनं तपोयोगादिकम् आचरति । ततश्च मोक्षं प्राप्नोति ॥ २२ ॥

**बलदेवः** तत्त्यागे फलम् आह एतैर् इति । श्रेयः स्वाश्रमकर्मादिश्रेयःसाधनम् । परां गतिं मुक्तिम् ॥ २२ ॥

यः शास्त्रविधिम् उत्सृज्य वर्तते कामकारतः ।
न स सिद्धिम् अवाप्नोति न सुखं न परां गतिम् ॥ २३ ॥

**श्रीधरः** कामादित्यागश्च स्वधर्माचरणं विना न सम्भवतीत्याह य इति । शास्त्रविधिं वेदविहितं धर्मम् उत्सृज्य यः कामचारतो यथेच्छं वर्तते स सिद्धिं तत्त्वज्ञानं न प्राप्नोति । न च परां गतिं मोक्षं प्राप्नोति ॥ २३ ॥

**विश्वनाथः** आस्तिक्यवत एव श्रेय इत्याह य इति कामचारतः ॥ २३ ॥

**बलदेवः** कामादित्यागः स्वधर्माद्विना न भवेत् । स्वधर्मश्च शास्त्राद्विना न सिध्येदतः शास्त्रम् एवास्थेयं सुधियेत्याह य इति । कामचारतः स्वाच्छन्द्येन यो वर्तते विहितम् अपि न करोति । निषिद्धम् अपि करोतीत्यर्थः । स सिद्धिं पुमर्थोपायभूतां हृद्विशुद्धिं नैवाप्नोति । सुखम् उपशमात्मकं च परां गतिं मुक्तिं कुतो वाप्नुयात् ॥ २३ ॥

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुम् इहार्हसि ॥ २४ ॥

**श्रीधरः** फलितम् आह तस्मादिति । इदं कार्यम् इदम् अकार्यम् इत्यस्यां व्यवस्थायां ते तव शास्त्रं श्रुतिस्मृतिपुराणादिकम् एव प्रमाणम् । अतः शास्त्रविधानोक्तं कर्म ज्ञात्वा इह कर्माधिकारे वर्त्मानो यथा'धिकारं कर्म कर्तुम् अर्हसि तन्मूलत्वात् सत्त्वशुद्धिसम्यग् ज्ञानमुक्तीनाम् इत्यर्थः ॥

देवदैतेयसम्पत्तिसंविभागेन षोडशे ।
तत्त्वज्ञानेऽधिकारस्तु सात्त्विकस्येति दर्शितम् ॥

इति श्रीश्रीधरस्वामिकृतायां भगवद्गीताटीकायां सुबोधिन्यां दैवासुरसम्पद्विभाग-योगो नाम षोडशोऽध्यायः ॥ १६ ॥

**विश्वनाथः**

> आस्तिका एव विन्दन्ति सद्गतिं सन्त एव ते ।
> नास्तिका नरकं यान्तीत्यध्यायार्थो निरूपितः ॥
> इति सारार्थवर्षिण्यां हर्षिण्यां भक्तचेतसाम् ।
> गीतासु षोडशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥

**बलदेवः** यस्माच् छास्त्रविमुखतया कामाद्यधीना प्रवृत्तिः पुमर्थाद्विभ्रंशयति । तस्मात् तव कार्याकार्यव्यवस्थितौ किं कर्तव्यं किम् अकर्तव्यम् इत्यस्मिन् विषये निर्दोषम् अपौरुषेयं वेदरूपं शास्त्रम् एव प्रमाणम् । न तु भ्रमादिदोषवता पुरुषेणोत्प्रेक्षितं वाक्यम् । अतः शास्त्रविधानेन कुर्यान् न कुर्यादिति प्रवर्तनानिवर्तनात्मकेन लिङ्तव्यादिपदेनोक्तम् । कर्म विहितं निषिद्धं च ज्ञात्वा निषिद्धं तत् परित्यजन् इह कर्मभूमौ विहितकर्माग्निहोत्रादि युद्धादि च कर्तुम् अर्हसि लोकसङ्ग्रहाय ॥ २४ ॥

> वेदार्थनैष्ठिका यान्ति स्वर्गं मोक्षं च शाश्वतम् ।
> वेदबाह्यास्तु नरकान् इति षोडशनिर्णयः ॥

इति श्रीमद्भगवद्गीतोपनिषद्भाष्ये षोडशोऽध्यायः ॥ १६ ॥